सत्यं शिवमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 6th Semester Examination, 2023

## SANADSE04T-SANSKRIT (DSE3/4)

## VEDA AND VYAKARANA

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।

### क-विभागः

1. यथेच्छम् ***एकः*** प्रश्नः समाधेयः। 10×1 = 10

(क) वैदिकवाङ्मये ऋषेः अरविन्दस्य अवदानम् आश्रित्य समासेन एकः प्रबन्धो विरच्यताम्।

(ख) वैदिकसाहित्येषु प्रतिबिम्बितं समाजजीवनम् आधारीकृत्य समासेन एको निबन्धो विरच्यताम्।

### ख-विभागः

2. अधो लिखितेषु प्रश्नेषु यथेच्छं ***पञ्च*** प्रश्नाः समाधेयाः। 2×5 = 10

(क) भाषाविज्ञानमित्यस्य कोऽर्थः ?

(ख) संगणकीयभाषाविज्ञाने पाणिनीयव्याकरणस्य गुरुत्वं द्वित्रैः वाक्यैः लेख्यम्।

(ग) NLP-इत्यस्य सम्पूर्णं नाम विलिख्यार्थो निर्णेयः।

(घ) Lexical Resources इत्यस्य कोऽर्थः ?

(ङ) भाषाप्रक्रियाकरणे पदविश्लेषकोपादानस्य (Morphological Analyzer) गुरुत्वं लेख्यम्।

(च) भाषाप्रक्रियाकरणे तिङन्तनिर्मापकोपादानस्य (Tinganta Analyzer) गुरुत्वं लेख्यम्।

(छ) Unicode-इति किम् ?

(ज) Lexical Resources इत्यस्योपयोगः कः ?

### ग-विभागः

3. अधःप्रदत्तेषु विषयेषु यथेच्छं ***विषयद्वयमाश्रित्य*** टीकां लिखत। 5×2 = 10

(क) निरुक्तकारः यास्कः

(ख) सायणः

(ग) म्याक्समूलारः

(घ) उल्डेनवार्गः

घ-विभागः

4. *यथेच्छमेकः* प्रश्नः समाधेयः । 10×1 = 10

(क) भट्टिकाव्यस्य द्वितीयसर्गमाधारीकृत्य शरदः सौन्दर्यं समासेन वर्णयत।

(ख) भट्टिकाव्यस्य द्वितीयसर्गे रामेण राक्षसानां निधनं यथा वर्णितं तथा वैशद्येन वर्ण्यताम्।

5. यथेच्छं ***श्लोकद्वयं*** व्याख्येयम्। 5×2 = 10

(क) तरङ्गसङ्गाच्चपलैः पलाशै-
ज्वालाश्रियं साऽतिशयं दधन्ति।
सधूमदीप्ताऽग्निरुचीनि रेजुस्-
ताम्रोत्पलान्याकुलषट्पदानि॥

(ख) वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः।
परस्परां विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवाऽऽदरेण॥

(ग) लतानुपातं कुसुमान्यगृह्णात्
स नद्यवस्कन्दमुपास्पृशच्च।
कुतूहलाच्चारुशिलोपवेशं
काकुत्स्थ ईषत् स्मयमान आस्त॥

(घ) सितारविन्दप्रचयेषु लीनाः
संसक्तफेणेषु च सैकतेषु।
कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः॥

——×——